S.V. D.V Puranetihas (293)

**Set No. 1**

Question Booklet No. 00007

# 15P/269/30

*(To be filled up by the candidate by blue/black ball-point pen)*

| Roll No. | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|

**Roll No. (Write the digits in words)** ..............................................................

**Serial No. of OMR Answer Sheet** ..............................................

**Day and Date** .............................................................. ( **Signature of Invigilator** )

## INSTRUCTIONS TO CANDIDATES

(Use only ***blue/black ball-point pen*** in the space above and on both sides of the **Answer Sheet**)

1. Within 10 minutes of the issue of the Question Booklet, check the Question Booklet to ensure that it contains all the pages in correct sequence and that no page/question is missing. In case of faulty Question Booklet bring it to the notice of the Superintendent/Invigilators immediately to obtain a fresh Question Booklet.
2. Do not bring any loose paper, written or blank, inside the Examination Hall ***except the Admit Card without its envelope.***
3. ***A separate Answer Sheet is given. It should not be folded or mutilated. A second Answer Sheet shall not be provided. Only the Answer Sheet will be evaluated.***
4. Write your Roll Number and Serial Number of the Answer Sheet by pen in the space provided above.
5. ***On the front page of the Answer Sheet, write by pen your Roll Number in the space provided at the top and by darkening the circles at the bottom. Also, wherever applicable, write the Question Booklet Number and the Set Number in appropriate places.***
6. ***No overwriting is allowed in the entries of Roll No., Question Booklet no. and Set no. (if any) on OMR sheet and Roll No. and OMR sheet no. on the Question Booklet.***
7. ***Any change in the aforesaid entries is to be verified by the invigilator, otherwise it will be taken as unfairmeans.***
8. ***Each question in this Booklet is followed by four alternative answers. For each question, you are to record the correct option on the Answer Sheet by darkening the appropriate circle in the corresponding row of the Answer Sheet, by pen as mentioned in the guidelines given on the first page of the Answer Sheet.***
9. For each question, darken only one circle on the Answer Sheet. If you darken more than one circle or darken a circle partially, the answer will be treated as incorrect.
10. *Note that the answer once filled in ink cannot be changed. If you do not wish to attempt a question, leave all the circles in the corresponding row blank (such question will be awarded zero marks).*
11. For rough work, use the inner back page of the title cover and the blank page at the end of this Booklet.
12. Deposit only **OMR** ***Answer Sheet*** at the end of the Test.
13. You are not permitted to leave the Examination Hall until the end of the Test.
14. If a candidate attempts to use any form of unfair means, he/she shall be liable to such punishment as the University may determine and impose on him/her.

**Total No. of Printed Pages : 24** *[उपर्युक्त निर्देश हिन्दी में अन्तिम आवरण पृष्ठ पर दिये गए हैं।]*

ROUGH WORK

रफ़ कार्य

# 15P/269/30

**No. of Questions : 150**

**प्रश्नों की संख्या : 150**

***Time : 2 Hours*** | ***Full Marks : 450***

***समय : 2 घण्टे*** | ***पूर्णाङ्क : 450***

**Note :** (1) Attempt as many questions as you can. Each question carries **3 (Three)** marks. ***One mark will be deducted for each incorrect answer***. **Zero** mark will be awarded for each unattempted question.

अधिकाधिक प्रश्नों को हल करने का प्रयत्न करें। प्रत्येक प्रश्न **3** (तीन) अंकों का है। *प्रत्येक गलत उत्तर के लिए एक अंक काटा जायेगा।* प्रत्येक अनुत्तरित प्रश्न का प्राप्तांक ***शून्य*** होगा।

(2) If more than one alternative answers seem to be approximate to the correct answer, choose the closest one.

यदि एकाधिक वैकल्पिक उत्तर सही उत्तर के निकट प्रतीत हों, तो निकटतम सही उत्तर दें।

**01.** श्रीमद्‌भागवते कति स्कन्धाः सन्ति?

(1) अष्टौ (2) दश (3) द्वादश (4) पञ्चदश

**02.** श्रीमद्भागवतस्य प्रथमस्कन्धे कति सन्त्यध्यायाः?

(1) एकोनविंशतिसङ्ख्यांकाः (2) विंशतिसङ्ख्याकाः

(3) त्रयोविंशतिसङ्ख्याकाः (4) पञ्चविंशतिसङ्ख्याकाः

**03.** श्रीमद्‌भागवतस्य प्रथमस्कन्धस्य प्रथमेऽध्याये प्रथमं पद्यं किमस्ति?

(1) सच्चिदानन्दरूपायेत्यादि (2) मङ्गलं भगवान् विष्णुरित्यादि

(3) कृष्णाय वासुदेवायेत्यादि (4) जन्माद्यस्य यतोऽन्वयादितरतश्चेत्यादि

**04.** 'अन्वयादितरत' इत्यत्र 'इतर'-शब्दस्य कोऽर्थः?

(1) अतिरेकः (2) व्यतिरेकः (3) समुद्रेकः (4) अनुत्सेकः

**05.** 'पुण्यश्लोकेड्यकर्मण' इति कस्यास्ति विशेषणम्?

(1) श्रीमतः (2) धीमतः (3) ह्रीमतः (4) भगवतः

**06.** स्वादु स्वादु पदे पदे किमस्ति ?

(1) आम्रफलम् (2) उत्तमश्लोकविक्रमः (3) द्राक्षारसः (4) श्रृङ्गाररसः

**07.** सर्वभूतहृदयो मुनिः कः?

(1) देवर्षिर्नारदः (2) वेदव्यासः (3) श्रीशुकः (4) रोमहर्षणः

**08.** का आत्मप्रसादिनी?

(1) अभिव्यक्तिः (2) भक्तिः (3) शक्तिः (4) प्रसक्तिः

**09.** 'अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात्' इति कस्योक्तिः?

(1) शुकस्य (2) व्यासस्य (3) सूतस्य (4) विदुरस्य

**10.** अच्युतभाववर्जितं किं न शोभते?

(1) गृहम् (2) शरीरम् (3) हृदयम् (4) नैष्कर्म्यम्

**11.** क आसीत्सत्यवतीसुतः?

(1) मैत्रेयः (2) व्यासः (3) शुकः (4) शाण्डिल्यः

**12.** ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा।

औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः॥

इति कस्योक्तिः?

(1) नारदस्य (2) ध्रुवस्य (3) प्रह्लादस्य (4) रुक्माङ्गदस्य

13. अधस्ताद्दीयमानेष्वेकंसमुचितं वाक्यमादाय श्लोकपूर्त्तिर्विधेया–

कृष्णाय वासुदेवाय हरये परमात्मने।

......... गोविन्दाय नमो नमः।।

(1) व्रजेन्द्रप्रियवत्साय (2) व्रजराजकुमाराय (3) नन्दरायतनूजाय (4) नन्दगोपकुमाराय

14. 'शार्ङ्गधन्वा' इति कस्येदं विशेषणम्?

(1) अर्जुनस्य (2) श्रीकृष्णस्य (3) प्रद्युम्नस्य (4) अनिरुद्धस्य

15. 'धर्मपुत्र' इति कस्याभिधानम्?

(1) युधिष्ठिरस्य (2) विदुरस्य (3) भीमस्य (4) सहदेवस्य

16. को भूतानि संयुनक्ति वियुनक्ति च?

(1) वायुः (2) देवराजः (3) दण्डपाणिः (4) ईश्वरः

17. कः कलिं निजग्राह?

(1) भगवान् (2) अर्जुनः (3) परीक्षित् (4) जनमेजयः

18. द्रौण्यस्त्रविप्लुष्टः को मातुरुदरे न मृतः?

(1) प्रद्युम्नः (2) अनिरुद्धः (3) परीक्षित् (4) असीमकृष्णः

19. द्व्यष्टवर्षीयः को मुनिः प्रसिद्धः?

(1) नारदः (2) सनत्कुमारः (3) सनत्सुजातः (4) शुकः

20. अस्मिन्कल्पे कति मनवो व्यतीताः?

(1) चत्वारः (2) पञ्च (3) षट् (4) सप्त

**21.** तृतीयस्य मनोर्नाम किं? स च कस्यासीत्सुतः?

(1) स्वारोचिषः, स आसीदग्निसुतः (2) उत्तमः, स आसीत् प्रियव्रतसुतः

(3) तामसः, स आसीत् प्रियव्रतसुतः (4) स्वायम्भुवः, स आसीद् ब्रह्मसुतः

**22.** गजेन्द्रः पूर्वजन्मनि क आसीत्?

(1) इन्द्रद्युम्ननामको राजा (2) ऋतुध्वजनामको राजा

(3) प्रद्युम्ननामको राजा (4) सिद्धिध्वजनामको राजा

**23.** 'सम्पश्यतां हरिरमूमुचदुस्त्रियाणाम्' इत्यत्र 'उस्त्रियाणाम्' इति पदस्य कोऽर्थः?

(1) अप्सरसाम् (2) गन्धर्वाणाम् (3) किम्पुरुषणाम् (4) देवानाम्

**24.** पूर्वजन्मनि गजेन्द्राय केन शापो दत्तः?

(1) दुर्वाससा (2) अङ्गिरसा (3) अगस्त्येन (4) अष्टावक्रेण

**25.** गजेन्द्रमोक्षण कथायाश्चरमं परमञ्च फलं किमस्ति?

(1) समृद्धिलाभः (2) अष्टसिद्धिलाभः

(3) वाक्सिद्धिलाभः (4) प्राणात्यये विमलामतिः

**26.** कस्मिन्मन्वन्तरे विभुनामकोऽभूद् इन्द्रः?

(1) स्वायम्भुवमन्वन्तरे (2) स्वारोचिषमन्वन्तरे

(3) तामसमन्वन्तरे (4) रैवतमन्वन्तरे

**27.** अजितावतारे भगवतो मातुर्नाम किमासीत्?

(1) प्रसूतिः (2) देवहूतिः (3) आकूतिः (4) सम्भूतिः

**28.** ब्रह्मणः सभा कुत्रास्ते?

(1) नन्दनवने (2) मन्दरमूर्धनि (3) मेरुमूर्धनि (4) हिमवतो मूर्धनि

**29.** विराट्पुरुषस्य भ्रुवोः को देवो वर्त्तते?

(1) यमः (2) पर्जन्यः (3) वरुणः (4) चन्द्रः

**30.** कस्येयमुक्तिः–

अरयोऽपि हि सन्धेयाः सति कार्यार्थगौरवे।
अहिमूषकवद्देवा ह्यर्थस्य पदवी गतैः॥

(1) ब्रह्मणः (2) शिवस्य (3) नारायणस्य (4) नारदस्य

**31.** समुद्रमन्थने मन्थनदण्डरूपेण कस्य गिरेः प्रयोगोऽभूत्?

(1) हिमगिरेः (2) मन्दरगिरेः (3) त्रिकूटगिरेः (4) चित्रकूटगिरेः

**32.** निर्मथ्यमानादुदधेः प्रथमं किमभूत्?

(1) हालाहलः (2) वारुणी (3) सुधा (4) क्षारद्रवः

**33.** काः स्वर्गिणां वल्गुगतिलीलाऽवलोकनैः रञ्जयन्ति?

(1) किन्नर्यः (2) अप्सरसः (3) गन्धर्व्यः (4) सिद्धाङ्गनाः

**34.** भगवान् धन्वन्तरिः कस्य कृते ख्यातः?

(1) धनुर्वेदस्य कृते (2) स्थापत्यवेदस्य कृते
(3) आयुर्वेदस्य कृते (4) गान्धर्ववेदस्य कृते

**35.** स्वर्भानुरिति कः?

(1) सूर्य : (2) चन्द्रः (3) राहुः (4) केतुः

**36.** 'पीते गरे वृषाङ्केण' इत्यत्र वृषाङ्क–पदस्य कोऽर्थः?

(1) गोवत्सः (2) वृषभः (3) धर्मः (4) शिवः

**37.** उच्चैःश्रवा कीदृश आसीत्?

(1) कृष्णकर्बुरः (2) चन्द्रपाण्डुरः (3) पीतपिङ्गलः (4) रक्तरोमशः

**38.** भगवत्परेति कस्या विशेषणम्?

(1) भक्तिदेव्याः (2) श्रीदेव्याः (3) गङ्गादेव्याः (4) मदालसायाः

**39.** समुद्रात्समुत्पन्नां वारुणीदेवीं के जगृहुः?

(1) सुराः (2) असुराः (3) गन्धर्वाः (4) किन्नराः

**40.** 'त्र्यधीश' इति पदस्य कोऽर्थः? कस्य कृते चास्य प्रयोगः कृतवान् भगवान् भागवतकारः?

(1) 'त्रिगुणसम्पन्नः', ब्रह्मणःकृते

(2) 'त्रिगुणातीतः', शिवस्य कृते

(3) 'त्रैलोक्यस्याधीश्वरः', भगवतोनारायणस्यकृते

(4) 'त्रिशिरा' – दैत्यस्य कृते

**41.** 'पाकशासन' इत्येषा कस्याख्या?

(1) विश्वकर्मणः (2) देवशर्मणः (3) इन्द्रस्य (4) उपेन्द्रस्य

**42.** "नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः' इति कस्य कृते इयमुक्तिः?

(1) दन्तवक्त्रस्य कृते (2) वृत्रस्य कृते

(3) नमुचिदानवस्य कृते (4) विरोचनाख्यदानवस्य कृते

**43.** नवममन्वन्तरस्य को मनुः?

(1) सावर्णिः (2) दक्षसावर्णिः (3) ब्रह्मसावर्णिः (4) धर्मसावर्णिः

**44.** 'फेरुराजगृहोपमाः' इत्यस्य कोऽर्थः?

(1) वनराजसिंहस्य गुहासदृशाः (2) यक्षेश्वरकुबेरस्य गृहसदृशाः

(3) जम्बुकानां गुहासदृशाः (4) ऋक्षाणां गुहासदृशाः

**45.** गुरुणा भर्त्सितः शप्तश्च कः सत्यं न जहौ?

(1) बलिः (2) उतथ्यः (3) वृषपर्वा (4) विश्वरूपः

**46.** इन्द्रसेनः कः?

(1) बलिः (2) विरोचनः (3) इन्द्रः (4) जयन्तः

**47.** कस्येयमुक्तिः–

"ब्रह्मन् यमनुगृह्णामि तद्विशो विधुनोम्यहम्।
यन्मदः पुरुषःस्तब्धो लोकं मां चावमन्यते॥"

(1) ब्रह्मणः (2) विष्णोः (3) शेषस्य (4) शिवस्य

**48.** कल्पेऽस्मिन् यो वैवस्वतमनुःसःपूर्वं क आसीत्?

(1) सत्यव्रतः (2) प्रियव्रतः (3) सुव्रतः (4) हितव्रतः

**49.** विन्ध्यावली कस्यासीत् पत्नी?

(1) विरोचनस्य (2) बलेः (3) वृषपर्वणः (4) शक्तिपुत्रस्य

**50.** 'जिह्ममीनः' कः?

(1) मत्स्यावतारधारी भगवान् (2) कुटिलनक्रः

(3) कश्चिद्दैत्यविशेषः (4) ऋषिः

**51.** एतेषु क आसीत् श्राद्धदेव:?

(1) देव: (2) गन्धर्व: (3) मनु: (4) उपदेव:

**52.** अप्रजस्य मनो: प्रजाप्राप्त्यर्थं वसिष्ठ: कयोर्देवयो: इष्टिं कृतवान्?

(1) द्यावापृथिव्यो: (2) मित्रावरुणयो: (3) अश्विनीकुमारयो: (4) सूर्याचन्द्रमसो:

**53.** का आसीत् श्रद्धा?

(1) वैवस्वतनमनो: पत्नी (2) ऋषिपत्तनस्य अधिष्ठात्री

(3) गन्धर्वी (4) किन्नरपत्नी

**54.** "स्थानं य: प्रविशेदे तत् स वै योषिद्भवेदिति" इति कस्योक्ति:?

(1) ब्रह्मण: (2) शिवस्य (3) वसिष्ठस्य (4) परशुरामस्य

**55.** 'कवि: कनीयान्विषयेषु निस्पृह:' इति कमुद्दिश्य इयमुक्ति:?

(1) वाल्मीकिमुद्दिश्य (2) मनुमुद्दिश्य (3) मनुपुत्रमुद्दिश्य (3) व्यासमुद्दिश्य

**56.** कस्य यज्ञे सर्वं याज्ञिकमुपकरणं हिरण्मयम् आसीत्?

(1) मरुत्तस्य (2) वरुणस्य (3) करुषस्य (4) पृषध्रस्य

**57.** अलम्बुषा का?

(1) अप्सरा (2) गन्धर्वी (3) नागकन्या (4) ऋषिपत्नी

**58.** "द्वे ज्योतिषी अजानन्त्या निर्भिन्ने कण्टकेन वै" इति कस्या: कथनम्?

(1) धन्याया: (2) सुकन्याया: (3) अनन्याया: (3) मञ्जुकन्याया:

**59.** केन अन्तःसमुद्रे कुशस्थलीनाम्नी नगरी निर्मिता?

(1) सद्योमन्युना (2) भूरिषेणेन (3) रेवतेन (4)ककुद्मिना

**60.** प्रभुसम्मितोपदेशः.......भवति–

(1) अर्थप्रधानः (2) ध्वनिप्रधानः (3) शब्दप्रधानः (4) तात्पर्यप्रधानः

**61.** श्रीहरिः कस्मै स्वभक्तवराय प्रत्यनीकभयावहं स्वसुदर्शनचक्रमददात्?

(1) नभगाय (2) नाभागाय (3) पृषद्ध्राय (4) अम्बरीषाय

**62.** ब्रह्मण आयुषः कालमानस्य का संज्ञा?

(1) प्रहरार्धः (2) द्विप्रहरार्धः (3) परार्द्धः (4) द्विपरार्धः

**63.** शर्व इति कस्य नाम?

(1) विष्णोः (2) ब्रह्मणः (3) शिवस्य (4) इन्द्रस्य

**64.** सप्तद्वीपपतिर्मान्धाता कस्य गार्हस्थ्यं वीक्ष्य विस्मितः स्तम्भमजहात्?

(1) इन्द्रस्य (2) भूरिभव्यस्य

(3) सौभरिमुनेः (4) कल्याणजीवनकिन्नरस्य

**65.** हरिश्चन्द्रः कस्यासीत्पुत्रः?

(1) पुरुकुत्सस्य (2) सत्यव्रतस्य (3) समञ्जस्य (4) त्रिशङ्कोः

**66.** क आसीत् नलसखः?

(1) ऋतुपर्णः (2) भगीरथः (3) सुदासः (4) सौदासः

**67.** कोदण्डपाणिरिति कस्याख्या?

(1) रघोः (2) दिलीपस्य (3) दशरथस्य (4) श्रीरामस्य

**68.** त्रेतायां वर्तमानायां रामराज्ये कालः कीदृशोऽभवत्?

(1) कृतसमः (2) द्वापरसमः (3) व्रतसमः (4) कल्याणक्रमः

**69.** "स्त्रियो ह्यकरुणाः क्रूरा दुमर्षाः प्रियसाहसाः" इति कस्या उक्तिः?

(1) अलम्प्रभायाः (2) विस्तब्धायाः (3) उर्वश्याः (4) तिलोत्तमायाः

**70.** नहुषः कस्य राज्ञः पुत्रोऽभूत्?

(1) पुरुरवसः (2) आयुषः (3) मधुच्छन्दसः (4) गृत्समदस्य

**71.** का रावणनीता?

(1) लङ्का (2) पंपा (3) सीता (4) मन्दोदरी

**72.** ससूर्याय महेन्द्राय पवनाय स्वयम्भुवे।
भूतेभ्यश्चाञ्जलिंकृत्वा चकार गमने मतिम्।।

कमुद्दिश्य इयमुक्तिः?

(1) पवनमुद्दिश्य (2) देवराजमुद्दिश्य (3) हनूमन्तमुद्दिश्य (4) सुग्रीवमुद्दिश्य

**73.** रावणस्य विमानं किमासीत्?

(1) पुष्पकम् (2) पुष्परथः (3) चित्रचक्रम् (4) मयूरवर्णकम्

**74.** विद्युद्गणविभूषितमेघ इव को बभौ?

(1) देवेन्द्रः (2) वरुणः (3) हनुमान् (4) सुग्रीवः

**75.** रावणेन सीतायाः कृते कियन्मासात्मकोऽवधिः प्रदत्तः?

(1) मासात्मकः (2) मासद्वयात्मकः (3) मासत्रयात्मकः (4) मासचतुष्टयात्मकः

**76.** लाङ्गूलचक्र इति कस्य विशेषणम्?

(1) सूर्यस्य (2) सूर्यरथस्य (3) हनूमतः (4) रावणस्य

**77.** "आत्मानं खादतानार्या न सीतां भक्षयिष्यथ" इति कयोक्तम्?

(1) निकुम्भिलया (2) प्रघसया (3) त्रिजटया (4) शूर्पणखया

**78.** हनूमतः सिन्धुलङ्घनसमये सागरजलं भित्वा क उत्पपात?

(1) नाकः (2) मैनाकः (3) पिनाकः (4) काकः

**79.** काऽऽसीत् सुरसा?

(1) दैत्यानांमाता (2) देवानां माता (3) नागानां माता (4) किम्पुरुषाणां माता

**80.** हनुमता सीतां श्रावयितु का कथा वर्णिता?

(1) व्योमकथा (2) योगकथा (3) रामकथा (4) आत्मकथा

**81.** "हृतहृत्सा हनुमता पपात विधुराम्भसि" इति कस्याः कृते इयमुक्तिः?

(1) सिंहिकायाः कृते (2) सुरसायाःकृते (3) लङ्कायाः कृते (4) भीमायाः कृते

**82.** लङ्कानगरी कुत्र अवस्थिताऽऽसीत्?

(1) मन्दरसानौ (2) त्रिकूटे (3) चित्रकूटे (4) विचित्रकूटे

**83.** के पण्डितमानिनः सन्तःकार्यं घातयन्ति?

(1) सेनापतयः (2) मन्त्रिणः (3) दूताः (4) पुरोहिताः

**84.** हनुमान् कस्मिन्समये लङ्कां प्रविवेश?

(1) प्रत्यूषकाले (2) उष:काले (3) रात्रौ (4) मध्याह्ने

**85.** "मामनिर्जित्य लङ्कापुरीं प्रवेष्टुं त्वं न समर्थ" इति कयोक्तम्?

(1) लङ्कानगर्याअधिष्ठात्र्या (2) सुरसादेव्या (3) कटङ्कटराक्षस्या (4) छायाग्राहिण्या

**86.** 'कामरूपिणी' इत्यस्य कोऽभिप्राय:?

(1) सुन्दरी (2) मदनपीडिता (3) यथेच्छांचारिणी (4) यथेच्छरूपधारिणी

**87.** शाद्वलेषु को विचचार?

(1) जाम्बवान् (2) हनुमान् (3) अङ्गद: (4) सुग्रीव:

**88.** हनुमता पीड्यमान: क: पर्वत: काञ्चनाञ्जनराजती: रीतीर्निवर्त्तयामास?

(1) मेकल: (2) मैनाक: (3) महेन्द्र: (4) प्लवङ्गम:

**89.** "सुपर्णमिव चात्मानं मेने स कपिकुञ्जर:" इत्यत्र सुपर्ण-शब्दस्य कोऽर्थ:?

(1) जटायु: (2) सम्पाती (3) अरुण: (4) गरुड:

**90.** क: चातुर्वर्ण्यस्य रक्षिता मर्यादानाञ्च रक्षिता?

(1) दशरथ: (2) जनक: (3) श्रीराम: (4) विश्वामित्र:

**91.** 'ध्वजिनीं मन्त्रिभिर्गुप्तां प्रेषयिष्यति मत्कृते इत्यत्र ध्वजिनी–शब्दस्य कोऽर्थ:?

(1) ध्वजधारिणीस्त्री (2) सेना (3) काचिद् देवी (4) गन्धर्वी

**92.** सीतया प्रत्यभिज्ञानार्थं का कथा श्राविता?

(1) चित्रकूटे घटिता काककथा (2) श्रवणकुमारकथा

(3) काकोलूकीय-कथा (4) करटकदमनक-कथा

**93.** प्रत्यभिज्ञानार्थं हनुमता किमर्पितं सीतायै?

(1) चूडामणिः (2) रामस्य मुद्रिका (3) पत्रिका (4) धनुर्ज्या

**94.** "मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने" इति कस्योक्तिः?

(1) श्रीरामस्य (2) सुग्रीवस्य (3) हनूमतः (4) अङ्गदस्य

**95.** "ध्रुवं प्रायमुपासिष्ये" हनूमत एतत्कथनस्य कोऽभिप्रायः?

(1) नूनमुपासनं करिष्यामि (2) ध्रुवलोकं गमिष्यामि

(3) निर्जलमुपोषणं करिष्यामि (4) किमपि न करिष्यामि

**96.** "तापसो वा भविष्यामि नियतो वृक्षमूलिकः" इत्येतत्कथनं कस्य?

(1) लक्ष्मणस्य (2) सुग्रीवस्य (3) हनूमतः (4) अङ्गदस्य

**97.** दीयमानेन विकल्पेनैकेन पद्यपूर्त्तिर्विधेया–

नमोऽस्तु रामाय सलक्ष्मणाय

..................................

नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो

नमोऽस्तु चन्द्राग्निमरुद्गणेभ्यः॥

(1) नमोऽस्तु सीरध्वजकन्यकायै

(2) नमः परायै परमेशिवर्व्यै

(3) देव्यै च तस्यै जनकात्मजायै

(4) नमः कृपाऽम्भोधितरङ्गरङ्ग्यै

**98.** "यदि जनकात्मजां लङ्कायां न हि द्रक्ष्यामि तर्हि अनेनैव वेगेन गमिष्यामि", क्व?

(1) सुरालयम् (2) रमणकद्वीपम् (3) नागालयम् (4) दण्डकारण्यम्

**99.** हनुमन्मते कः क्षुद्रः हीनो नृशंसमूर्त्तिश्चेति?

(1) रावणः (2) रावणिः (3) कुम्भकर्णः (4) कुम्भोदरः

**100.** त्रैलोक्यराज्यं सकलं कस्याः कलांनाप्नुयात्?

(1) गौर्य्याः (2) सीतायाः (3) शचीदेव्याः (4) मन्दोदर्याः

**101.** अशोकवृक्षा जनकनन्दिन्याः कृते किं जनयन्ति?

(1) मोदम् (2) साध्वसम् (3) शोकम् (4) मोहम्

**102.** मैथिलीं प्रेक्ष्य हनुमान् किमतुलं लेभे?

(1) प्रहर्षम् (2) तर्षम् (3) उत्कर्षम् (4) अमर्षम्

**103.** रावणं प्रति संवदन्त्या सीतया मर्यादारक्षणार्थं किमन्तरितम्?

(1) तृणम् (2) वृक्षशाखाम् (3) वृक्षमूलम् (4) अशोकवृक्षम्

**104.** कस्तरुणादित्यवर्णाभ्यां कुण्डलाभ्यां विभूषित आसीत्?

(1) श्रीरामः (2) लक्ष्मणः (3) सुग्रीवः (4) रावणः

**105.** श्रीरामं मातङ्गसदृशं निरुपयन्ती सीता रावणं कीदृशमुक्तवती?

(1) शशसदृशम् (2) गोमायुसदृशम् (3) कृकलाससदृशम् (4) नागसदृशम्

**106.** "अहं नापहर्तुंशक्या तथाप्येष विधिः कृतो रामेण?

(1) तव वधाय (2) रक्षसां व्यामोहाय (3) मनोविनोदाय (4) स्वशौण्डीर्यदर्शनाय

**107.** भूषितोऽपि केन सदृशो भयङ्कर आसीद् रावणः?

(1) वृकसदृशः (2) पिशाचसदृशः (3) श्मशान चैत्यसदृशः (4) यमसदृशः

**108.** "मया क्रीड महाराज सीतया किं तवानया" इति कयोक्तो रावणः?

(1) धान्यमालिन्या (2) मन्दोदर्या (3) एककर्णया (4) अतिनेत्रया

**109.** 'करतलोदरी' इति कस्या विशेषणम्?

(1) सीतायाः (2) रुमायाः (3) तारायाः (4) मन्दोदर्य्याः

**110.** अगस्त्यस्य पत्न्याः किन्नामासीत्?

(1) सुवर्चला (2) लोपामुद्रा (3) सुकन्या (4) शुभ्रलोचना

**111.** नष्टभर्त्री यथाऽङ्गना तादृशी का भविष्यति?

(1) मन्दोदरी (2) शम्पा (3) पम्पा (4) लङ्का

**112.** कया राक्षस्या स्वप्नो रामेण सङ्गता सीता दृष्टा?

(1) त्रिजटया (2) सङ्गतया (3) लम्बकर्णया (4) कर्दमक्लिन्नया

**113.** वातात्मजो बुद्धिमतां वरिष्ठः, कः?

(1) बृहस्पतिः (2) मैनाकः (3) हनुमान् (4) जाम्बवान्

**114.** "न पिबेयं न खादेयं प्रत्यहं मम भोजनम्" कस्या इयमुक्तिः?

(1) सीतायाः (2) मन्दोदर्याः (3) सुमित्रायाः (4) कैकेय्याः

**115.** सीतायै हनुमत्प्रदत्ते रामस्याङ्गुलीयके कस्याङ्कनमासीत्?

(1) हंसचित्रस्य (2) मयूरस्य (3) ओङ्कारस्य (4) रामनाम्नः

**116.** "रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति" इत्येतत्कथनं कस्याः?

(1) कौसल्यायाः (2) सुमित्रायाः (3) सीतायाः (4) रुमायाः

**117.** काकाय ब्रह्मास्त्रप्रयोगः कः कृतवान्?

(1) रामः (2) लक्ष्मणः (3) भरतः (4) शत्रुघ्नः

**118.** "ममैव दुष्कृतं किञ्चिन्महदस्ति न संशयः" कस्येदं कस्या वा कथनम्?

(1) विलासवत्याः (2) जनकनन्दिन्याः (3) भद्रायाः (4) मन्दोदर्याः

**119.** सीतया रामाय प्रत्यभिज्ञानरूपं किं वस्तु प्रेषितम्?

(1) अङ्गुलीयकम् (2) चूडामणिः (3) केयूरद्वयम् (4) कङ्कणचतुष्टयम्

**120.** अक्षकुमारस्य वधः केन कृतः?

(1) श्रीरामेण (2) लक्ष्मणेन (3) सुग्रीवेण (4) हनुमता

**121.** रावणो नन्दिना कुत्र शप्तः?

(1) प्रवर्षणे (2) कैलासे (3) मन्दरे (4) सह्ये

**122.** ''दूता न वध्या: समयेषु राजन्'' इति केनोक्तम्?

(1) प्रहर्षेण (2) प्रहस्तेन (3) विभीषणेन (4) कृतकेन

**123.** वस्त्रादिभिर्लाङ्गूले संवेष्ट्यमाने महाकपिर्हनुमान् किमकरोत्?

(1) ननाद (2) जहास (3) व्यवर्धत (4) विजहार

**124.** हनुमतो लाङ्गूलप्रज्वालनवृत्तं श्रुत्वा सीता किं कृतवती?

(1) शक्रमाजुवाह (2) ब्रह्माणं प्रार्थितवती (3) तीव्रं चुक्रोश (4) हव्यवाहनमुपतस्थे

**125.** हनुमान् लङ्कादहनक्रमे कस्य गृहं प्रथमं ददाह?

(1) प्रहस्तस्य (2) महापार्श्वस्य (3) वज्रदंष्ट्रस्य (4) शुकस्य

**126.** लङ्कादहनानन्तरं कस्यकृते परितापं कृतवान् मारुति:?

(1) रावणस्यकृते (2) विभीषणस्य कृते (3) सीताया: कृते (4) मन्दोदर्या: कृते

**127.** स्वचरित्राभिगुप्तेति कस्या: कृतेयमुक्ति:?

(1) सीताया: कृते (2) सावित्र्या: कृते (3) शच्या: कृते (4) सरस्वत्या: कृते

**128.** कस्य वृक्षस्य मूले जानकी पर्यवस्थिताऽऽसीत्?

(1) अशोकवृक्षस्य मूले
(2) शिंशपावृक्षस्य मूले
(3) वटवृक्षस्य मूले
(4) अश्वत्थवृक्षस्य मूले

**129.** ''विश्रान्त: श्वो गमिष्यसि?'' इति कयोक्तो हनुमान्?

(1) लक्ष्म्या: (2) शैलपुत्र्या (3) सीतया (4) मन्दोदर्या:

**130.** त्रीनुपायानतिक्रम्य कश्चतुर्थ उपायो युज्यते?

(1) पराक्रम: (2) सामप्रयोग: (3) दामप्रयोग: (4) अनुपयोग:

**131.** पद्यपूर्ति: करणीया

जयत्यतिबलो रामो लक्ष्मणश्च महाबल:।

............. राघवेणाभिपालित:।।

(1) भरतश्च जयत्येष (2) शत्रुघ्न सततं जीयात्

(3) राजा जयति सुग्रीव: (4) हनूमांश्च जयत्वेष

**132.** क आसन् मेरुमन्दरसङ्काशा:?

(1) देवा: (2) दानवा: (3) कपय: (4) ऋक्षा:

**133.** रावण: कस्यासीत् पुत्र:?

(1) पुलस्त्यस्य (2) क्रतुभुज: (3) विश्रवस: (4) विभाण्डकस्य

**134.** ''क्षीबोविचित्राभरण:'' इत्यत्र 'क्षीब'-शब्दस्य कोऽर्थ:?

(1) स्थूल: (2) मदाकुल: (3) सुन्दर (4) कुशल:

**135.** रावण: शुना शार्दूलयोरिव कयो: सन्दर्शने स्थातुं न शक्नोति?

(1) हनुमत्सुग्रीवयो: (2) नलनीलयो: (3) रामलक्ष्मणयो: (4) इन्द्रोपेन्द्रयो:

**136.** श्रीरामो द्विरदवत् तदा रावण: कीदृश: प्रोक्त: सीतया?

(1) सर्पवत् (2) शशवत् (3) श्ववत् (4) मर्कटवत्

**137.** हनुमता स्वलाङ्गूलाग्निः क्व निर्वापितः?

(1) रावणगृहस्य दीर्घिकायाम् (2) अशोकवनपुष्करिण्याम्

(3) समुद्रे (4) श्वेतकूपे

**138.** ''सर्वथा कृतकार्योऽसौ हनूमान् नात्र संशयः'' इतिकेनोक्तम्?

(1) सुग्रीवेण (2) जाम्ववता (3) अङ्गदेन (4) नलेन

**139.** कः पर्वतो 'मातरिश्वनः सखा' इत्युक्तः सुन्दरकाण्डे?

(1) कैलासः (2) गोवर्द्धनः (3) मैनाकः (4) त्रिकूटः

**140.** के पुरा पक्षवन्तो बभूवुः?

(1) पर्वताः (2) मनुष्याः (3) किन्नराः (4) गावः

**141.** 'सुखीभव महाबाहो प्रीताऽस्मि तव वानर' इति कस्योक्तिः?

(1) सुरसायाः (2) सिंहिकायाः (3) नन्दिन्याः (4) छायाग्राहिण्याः

**142.** दधिमुखः कः?

(1) गन्धर्वः (2) यक्षः (3) किन्नरः (4) वानरः

**143.** ''प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम्'' कस्य विषये इयमुक्तिः?

(1) हनुमद्विषये (2) सुग्रीवविषये (3) अङ्गदविषये (4) दधिमुखविषये

**144.** ''न मे मधुवनं हन्याददृष्ट्वा जनकात्मजाम्''। कस्य विषये इयमुक्तिः?

(1) राघवस्य (2) लक्ष्मणस्य (3) सुग्रीवस्य (4) हनुमतः

**145.** क आसीत् सीतावृत्तान्तकोविदः?

(1) रामः (2) लक्ष्मणः (3) हनुमान् (4) अङ्गदः

**146.** वानरेषु को युवराजः प्लवतांवरश्चासीत्?

(1) अङ्गदः (2) मैन्दः (3) नीलः (4) नलः

**147.** वानराणां हर्षोत्फुल्लमयः शब्दः कः?

(1) केका (2) प्रस्रवणः (3) किलकिला (4) गर्जनम्

**148.** 'पिबन्तु हरयो मधु' इति केनादिष्टम्?

(1) सुग्रीवेण (2) अङ्गदेन (3) जाम्बवता (4) मैन्देन

**149.** मधुवन-कदनस्य सूचना केन दत्ता सुग्रीवाय?

(1) कोकनदेन (2) दधिमुखेन (3) अङ्गदेन (4) मैन्देन

**150.** "नय मामपि तं देशम्" इति कस्योक्तिः?

(1) श्रीरामस्य (2) लक्ष्मणस्य (3) मैन्दस्य (4) नीलस्य

ROUGH WORK
रफ़ कार्य

# अभ्यर्थियों के लिए निर्देश

*(इस पुस्तिका के प्रथम आवरण पृष्ठ पर तथा उत्तर-पत्र के दोनों पृष्ठों पर केवल नीली-काली बाल-प्वाइंट पेन से ही लिखें)*

1. प्रश्न पुस्तिका मिलने के 10 मिनट के अन्दर ही देख लें कि प्रश्नपत्र में सभी पृष्ठ मौजूद हैं और कोई प्रश्न छूटा नहीं है। पुस्तिका दोषयुक्त पाये जाने पर इसकी सूचना तत्काल कक्ष-निरीक्षक को देकर सम्पूर्ण प्रश्नपत्र की दूसरी पुस्तिका प्राप्त कर लें।
2. परीक्षा भवन में ***लिफाफा रहित प्रवेश-पत्र के अतिरिक्त,*** लिखा या सादा कोई भी खुला कागज साथ में न लायें।
3. ***उत्तर-पत्र अलग से दिया गया है। इसे न तो मोड़ें और न ही विकृत करें। दूसरा उत्तर-पत्र नहीं दिया जायेगा। केवल उत्तर-पत्र का ही मूल्यांकन किया जायेगा।***
4. अपना अनुक्रमांक तथा उत्तर-पत्र का क्रमांक प्रथम आवरण-पृष्ठ पर पेन से निर्धारित स्थान पर लिखें।
5. ***उत्तर-पत्र के प्रथम पृष्ठ पर पेन से अपना अनुक्रमांक निर्धारित स्थान पर लिखें तथा नीचे दिये वृत्तों को गाढ़ा कर दें। जहाँ-जहाँ आवश्यक हो वहाँ प्रश्न-पुस्तिका का क्रमांक तथा सेट का नम्बर उचित स्थानों पर लिखें।***
6. ***ओ० एम० आर० पत्र पर अनुक्रमांक संख्या, प्रश्नपुस्तिका संख्या व सेट संख्या (यदि कोई हो) तथा प्रश्नपुस्तिका पर अनुक्रमांक और ओ० एम० आर० पत्र संख्या की प्रविष्टियों में उपरिलेखन की अनुमति नहीं है।***
7. ***उपर्युक्त प्रविष्टियों में कोई भी परिवर्तन कक्ष निरीक्षक द्वारा प्रमाणित होना चाहिये अन्यथा यह एक अनुचित साधन का प्रयोग माना जायेगा।***
8. ***प्रश्न-पुस्तिका में प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं। प्रत्येक प्रश्न के वैकल्पिक उत्तर के लिए आपको उत्तर-पत्र की सम्बन्धित पंक्ति के सामने दिये गये वृत्त को उत्तर-पत्र के प्रथम पृष्ठ पर दिये गये निर्देशों के अनुसार पेन से गाढ़ा करना है।***
9. प्रत्येक प्रश्न के उत्तर के लिए केवल एक ही वृत्त को गाढ़ा करें। एक से अधिक वृत्तों को गाढ़ा करने पर अथवा एक वृत्त को अपूर्ण भरने पर वह उत्तर गलत माना जायेगा।
10. ***ध्यान दें कि एक बार स्याही द्वारा अंकित उत्तर बदला नहीं जा सकता है। यदि आप किसी प्रश्न का उत्तर नहीं देना चाहते हैं, तो संबंधित पंक्ति के सामने दिये गये सभी वृत्तों को खाली छोड़ दें। ऐसे प्रश्नों पर शून्य अंक दिये जायेंगे।***
11. रफ कार्य के लिए प्रश्न-पुस्तिका के मुखपृष्ठ के अंदर वाला पृष्ठ तथा उत्तर-पुस्तिका के अंतिम पृष्ठ का प्रयोग करें।
12. परीक्षा के उपरान्त केवल ***ओ एम आर उत्तर-पत्र*** परीक्षा भवन में जमा कर दें।
13. परीक्षा समाप्त होने से पहले परीक्षा भवन से बाहर जाने की अनुमति नहीं होगी।
14. यदि कोई अभ्यर्थी परीक्षा में अनुचित साधनों का प्रयोग करता है, तो वह विश्वविद्यालय द्वारा निर्धारित दंड का/की, भागी होगा/होगी।